### ।। श्री गणराज समर्थ ।।

# अथ श्रीमद्‍गणेशपुराणोक्तं कुजन्मनाशनस्तोत्रम्

शौनकौर्वावूचतु: ।

विश्वस्य बीजं परमस्य पाता । नानाविधानंदकर: स्वकानाम् ।।
निजार्चनेनादृतचेतसां त्वं । विघ्नप्रहर्ता गुरुकार्यकर्ता ।।१।।

परात्परस्त्वं परमार्थभूतो । वेदांतवेद्यो हृदयातिगोऽपि ।।
सर्वश्रुतीनां न गोचरोसि । नमाव इत्थं निजदैवतं त्वां ।।२।।

न पद्मयोनिर्न हरो हरिश्च । नेन्द्र: षडास्यो न सहस्त्रमूर्ध्दा ।।
मायाविनस्ते च विदु: स्वरुपं । कथं नु शक्यं परिनिश्चितुं तत् ।।३।।

तवानुकंपा महती यदा स्याद् । विभुंजत: कर्म शुभाशुभं स्वं ।।
कायेन वाचा मनसा नमेत्त्वां । जीवंश्च मुक्तो नर उच्यते स: ।।४।।

त्वं भावतुष्टो विदधासि कामान् । नाना विधाकारतयाऽखिलानां ।।
संसारकृपादविमुक्तिहेतु-- । रतो विभुं त्वां शरणौ प्रपन्नौ ।।५।।

श्रीमद्‍गणेशउवाच ।। कुजन्मनाशकमिदं मम स्तोत्रं पठेत्तु य: ।
त्रिसंध्यं च त्रिवारं च सर्वान्कामानवाप्नुयात् ।।६।।

षण्मासाज्जायते विद्या लक्ष्मी नित्यजपादपि ।।
पंचवारजपान्मर्त्य आयुरारोग्यमाप्नुयात् ।।७।।

इति श्रीमद्‍गणेश-पुराणोक्तं कुजन्मनाशकं गणेशपंचकं समाप्तं ।।